श्रीमन्त्रशब्दशिवलब्धवरप्रसादात् तस्मात् श्रीमद्यतीन्द्रविबुधेन्द्रवरात् सः श्रीचन्द्रशेखरमुनीश्वरवंशजातः सर्वज्ञचन्द्र इति विप्रकुलोत्तमोऽस्ति इत्यन्वयो भाव्यः। वैद्यग्रन्थत्वात्सर्वत्र काव्यव्याकरणादिदोषा न गणनीयाः। इदं समनन्तरश्लोकादौ स्पष्टम् । अत्र ज्ञानचन्द्र इत्येव ग्रन्थकर्तुर्नामेति पुष्पिकातः 'तृतीयश्लोकाच्च ज्ञायते। स एव 'सर्वज्ञचन्द्रः' इति यतिभङ्गपरिहारार्थमत्रोक्तः स्यात् ॥

---

1 ॠषीश्वर -दें

लोके [1]सर्वभिषङ्मनोहर[1]भिषक् [2]शास्त्रा[2]न्धकारापहा
गुर्वीगर्वमदान्धसर्वगदचोर[3]स्तोमर[3]वतात्तरा।
[4]श्रीमद्विश्वक[4]रूपदृग्विषजरा[5]जाल[5] [6]भ्रमघ्नं[6]क्रमा-
[7]द्दारि[7]द्रयाम्बुधि[8]तारिणीव[8] रसकौमुद्यक्षयं दीप्यते॥2॥

सर्वाणि रसशास्त्राणि विमृश्य रसकौमुदी।
ज्ञानचन्द्रेण रचिता संक्षेपेण महात्मना ॥3॥

कवेर्नाम ज्ञानचन्द्रः [9]तच्छास्त्रं[9] रसकौमुदी।
[10]अन्यैः[10] रसभिषक्शास्त्रप्रकारैः किं प्रयोजनम् ॥4॥

रसकौमुदी[11]शास्त्रं[11] लोकहितार्थं विविच्यते वक्ष्यामः।
*तद्देहलोहसिध्यै शरीरिणां सकलसिद्धशास्त्रोक्तम् ॥5॥

आदौ तावद्रसो[12]त्पत्तिं[12] [13]शुद्धिं[13] च लयाकारणम्।
तत्स्वरूपं च [14]तद्भेदान्[14] क्रमाद्वक्ष्यामि शृण्वताम् ॥6॥

---

* 'तदीह' इति स्यात्। आर्यास्कन्धकयोर्मिक्षणमतिस्त्यत्रे भाति ॥

---

1 सर्वभिषमनोहर - दे, सर्वाभीष्ट - ना 2 शास्त - दे 3 स्तोमरा - दे
4 सर्पद्विखक - दे, ना 5 जार - दे 6 भ्रमघ्न - दे 7 दारि - दे 8 तारणी- द
9 तचात्र - दे 10 अस्य - दे, ना 11 शास्त्र - ना 12 त्पत्तिः-ना 13 सिद्धिं- दे
14 तद्भेदाः - ना

*तस्मिन् काले पुरा [1]कामस्तत्सामर्थ्या[1]त्समुद्यतः।
व्रह्म[2]विष्णु[2]शिवत्मेषु प्रयोगं कुरुते क्रमात् ॥ 7 ॥

ईश्वरः सर्व[3]लोकेशास्तेषां[3] ¢[4]कामाधि[4]काधिकः[4]।
[5]मोहिनीनां[5] प्रभावेन [6]स देव्यां[6] रमते भृशम् ॥ 8 ॥

निरन्तरं महागाढरत्या वीर्यो[7]द्भवोऽ भवत्[7]।
जगदापूरितं तेन महाप्रलयकालवत् ॥ 9 ॥

सूर्येन्दुतारकादिनामुदयास्तं विना जमत्।
**[8]आधिभूतं[8] [9]जगत्सर्वं[9] मातरं शिशुवद्विना ॥ 10 ॥

तस्माल्लम्बोदराद्याश्च कुमाराः [10]शक्तय[10]स्तथा।
$रुद्रभूवं सदा [11]भूमिस्तदा[11]संपीडिताऽभवत् ॥ 11 ॥

---

* रसोत्पत्तिप्रकारं पुराणप्रक्रियया वर्णयितुमुपक्रमते तस्मिन्नित्यादि ॥
¢ मन्मथोपेक्ष्या अत्यन्तमुत्कृष्ट ईश्वर इति भावः ॥
** जगत्सर्वं मातरं विना शिशुवत् अधिभूतम् अधिग्रस्तमभूदित्यर्थः ॥
$ रुद्रभूतम्=रुद्रमयं भूतं जगत्। तद्वीर्यं वेदुमक्षमाभूमिः संपीडिता अभवत्॥

---

1 कामः तेसामर्थ्या - दे 2 विष्णुः - ना 3 लोकेशःतेषां-दे 4 कोधिकः - ना
5 मोहितानां - दे 6 स्वदेव्यां - दे 7 द्रवो भवत् - दे 8 आदिभूतं - ना
9 जगत्स्तर्वं - ना 10 शक्तयः - ना 11 भूमिर्भार - दे

*[1]अघोषयंस्तदा[1] ब्रह्मविष्ण**रुद्रेन्द्रदेवताः।
महाश्चर्यगताः [2]सर्वे[2] मुनयोऽमित[3]तेजसः[3] ॥ 12 ॥

†विरिञ्चिं प्रति गच्छन्ति तत्र चाक्रोशयन्ति ते।
††[4]साचार[4]सर्वधर्मांश्च परित्यज्याद्भुतं गताः ॥ 13 ॥

$सोऽपि कामान्धकाराब्धि[5]मग्नोऽजः[5] [6]सतीसोदरः[6]।
एतत् कामान्धकार्यं न जानामीति वचोऽब्रवीत् ॥ 14 ॥

श्रुत्वा तदीरितं वाक्यं एतत्ते मुनिपुङ्गवाः।
तत्सानै (?) र्वासवं वाणी निवसत्परिते विधिः ॥15॥

ततो विष्णुं समागत्य ततः सर्वमुनीश्वराः।
[7]सक्रोधा[7]स्तत्र तिष्ठन्ति यस्य [8]चापि[8] रसं विना ॥ 16 ॥

---

* अघोषयन् - आक्रन्दन्नित्यर्थः ॥
** रुद्रोऽयमीश्वरातिरिक्तोऽवरः ॥
† विरिञ्चिम् = जगत्पतिम्
†† आचारसहितान् सर्वधर्मांश्च परित्यज्येत्यर्थः ॥
$ सोऽपि = जगत्पतिरपि ॥ सतीसोदरः = पार्वती
भ्राता = विष्णुः। 'न जानामि' इति वचोऽब्रवीत् ॥

---

1 अघोवयंसदा - ना 2 सर्वा - ना. 3 चेतसः - दे 4 साचारः - न 5 र्मग्नोजः-ना
6 सनिरोदरः - दे 7 क्रोध - दे 8 चाप - दे

यन्निमित्तमिदं कार्यं [1]जगत्क्षोभ[1]मुदीरितम्।
ज्ञानदुष्टातुरं ज्ञात्वा [2]त्वं[2] रुद्र [3]त्वदित[3]स्तथा ॥ 17 ॥

स्वशरीरार्द्धनारीति [4]अशरीरी[4] भवत्विति।
स्वशरीरार्द्ध[5]हानित्वा[5]त्पार्वत्या पार्वतीप्रियः ॥ 18 ॥

तथैव बुद्धौ ज्ञानेन निर्गत्याथ सविस्मयः।
जगदापूरितं वीर्यं पाताले तत्र तत्र च ॥ 19 ॥

स्थापयत्यदितिः सर्वे मुनयः सर्वदेवताः।
ब्रह्मानन्दगताः [6]सर्वे[6] [7]मातृ[7]वत्पूर्ववज्जगत् ॥ 20 ॥

इति रसोत्पत्यधिकारः

रसशुद्धिः

[8]त्रिमूर्त्या[8]त्मक [9]रूपोऽयं[9] सर्वदोषविवर्जितः।
[10]रसः[10] सोऽमृततुल्याख्यः सर्वरोगहरोऽ[11]भवत्[11] ॥ 21 ॥

---

1 जगत्काल - ना 2 तं - दे 3 मरित - दे, ना 4 अशरिरि - दे 5 हारित्वा - ना
6 सर्वो-ना 7 माभव - दे 8 त्रिमूर्या-दे 9 स्वरूपेण-ना 10 रस-दे 11 भवेत्-ना

*दोषाविहीनकः सूतः सर्व[1]रोगकरो[1] भवेत्।
सोऽपि वैद्यो विदग्धोऽपि [2]दोषहा[2]न्यास्पदो भवेत् ॥ 22 ॥

उड्डीनत्वं च कौटिल्यमनावर्त्तं च सङ्करम्।
षण्डत्वं वह्निकारित्वं समलत्वं गुरुत्वता ॥ 23 ॥

सविषं पञ्च सूतस्य नव [3]दोषाः[3] प्रकीर्त्तिताः।
उड्डीने [4]शूलदोषः[4] स्यात्कौटिल्ये स्यात्कपालरुक् ॥ 24 ॥

अनावर्ते [5]भ्रमोद्वेगः[5] [6]सङ्करे[6] दोष[7]सञ्चयः[7]।
[8]षण्डत्वे[8] स्यादसन्तानो वह्निर्दाहादिकुष्टकृत् ॥ 25 ॥

[9]मलत्वे[9] वान्तिच्छर्दादिमहोदर[10]गदानु[10] [11]रूद्[11]।
गुरुत्वे जाड्यमूर्च्छास्या[12]द्विषे[12] मृत्यु (क्षयो) भवेत् ॥ 26 ॥

---

*दोषाविहीनकः = दोषेण अवर्जितः। सूत इति रसस्य नाम। 'रसः सूतश्च पारदे' (अम वैश्य - द्वि IX 692) इत्यमरः । "रसेन्द्रः पारदः सूतः सूतराजश्च सूतकः । शिवतेजो रसः सप्त नामान्येवं रसस्य तु।।" इति रसेन्द्रसारसंग्रहः । दोषहान्यास्पदः दोषारपदः हान्यास्पदश्च ॥

1 रोगहरो - ना 2 दोवह - ना 3 दोषा - ना 4 दोषशूलः - दे 5 भवोद्वेगः - ना 6 सङ्करो - ना 7 सचयम् - दे 8 षण्डत्व - ना 9 मलत्वै - दे 10 गदान् - दे 11 गदः - दे, रुद - ना 12 द्विष - ना

यथा लोहे तथा देहे गुणावगुणसङ्करः।
तथा सूतनस्य सुद्यर्थं नव कर्म समीर्यते ॥ 27 ॥

*मर्दनोत्थापने तस्य पातर्न चैव दीपनम्।
जारणं [1]मारणं[1] ग्रासप्रधानं रञ्चनं तथा ॥ 28 ॥

क्रामणं चैव सर्वेषां [2]देहिना[2]मुपयो[3]गतः[3]।
मर्दनादेव नैर्मल्यमुत्थापनाल्लघुर्भवेत् ॥ 29 ॥

पातनादेव चाञ्चल्यं [4]हरेत्सृष्टि[4]रसायनम्।
दीपनान्मुखतेजस्वी जारणा[5]न्निर्मलो[5] भवेत् ॥ 30 ॥

सारणा[6]दक्षयो[6] भूत्वा लोहग्रासमुखो भवेत्
ईदृग्विधरसो देहलोहसिद्धेकरः परः।
रञ्जनात्सर्व[7]रोगघ्नः[7] क्रमणोद्वेधको भवेत्
ईदृग्विधरसाद्देहलोहसिद्धिकरं परम् ॥ 31 ॥

इति रसशुद्धिः

* 'पातनम्' इति स्यादुत्तरानुसारात् ॥ (श्लो 10)

---

1 मरणं - न 2 देहिना - ना 3 गता - दे 4 हरेत्सृद्धि - ना 5 निर्मलो - ना
6 दक्षये - ना 7 दोषघ्नः - ना

रससंस्कारः

मर्दनविधिः

त्रिक्षारं पञ्चलवणं नवसारं च चित्रक्रम्।
त्रिकटुत्रिफलोन्मत्तरजनीगुडसर्षपम् ॥ 32 ॥

एतत्सर्वं रसेन्द्रस्य त्रिंशांशं निक्षिपेत्समम्।
शृङ्गि[1]बेर[1]रसेनापि कुमारी[2]स्वरसेन[2] च ॥ 33 ॥

त्रिदिनं मर्दयेत्सूत[3]मातपे[3] निक्षिपेद्दृढम्।
नवदोषविनिर्मुक्तो निर्मलो जायते रसः ॥ 34 ॥

इति मर्दनविधिः

उत्थापनविधिः

कुमारीत्रिफलाचित्रैर्मलं वह्निविषं क्रमात्।
क्षारं द्वयेन कौटिल्यं [4]लवणेन निवर्त्तकम्[4] ॥ 35 ॥

सङ्करं नवसारेण उन्मत्तेन तथोड्डिनम्।
गुरुत्वं [5]त्रिकटुर्हन्ति[5] रजनीगुडसर्षपैः ॥ 36 ॥

---

1 वेर-ना 2 स्वररसेन-दे 3 जातपे-ना 4 लवणैरनिवर्त्तकम-दे लवणेनतुकर्तरम्-ना
5 त्रिकुटेनैव - दे

षण्डत्वं च क्रमादेव नवदोषान् विनाशयेत्।
*भाण्डद्वयकृते यत्ने लोहविद्याधराह्वयम् ॥ 37 ॥

सूतं चतुष्पलं तस्य द्विगुणं लवणं क्षिपेत्।
[1]जम्बीरजं रसं[1] योज्यं निक्षिपे[2]द्वज्रमृत्स्नया[2] ॥ 38 ॥

तत्सन्धिबन्धनं कृत्वा त्रिदिनं पाचयेच्छनैः।
तेनैवोर्ध्वगतः सूतः पुनरुज्जीवनायते ॥ 39 ॥

इति उत्थापनाविधिः

पातनविधिः

पाठाकरञ्जस्व[3]रसैः[3] संमर्द्य च रसं पुनः।
कृष्णोन्मत्तरसं पूर्य दिनमेकं तु पाचयेत्।
अधः पतति तत्सूतो जायते हेमरूपवत् ॥ 40 ॥

इति पातनविधिः

---

* विद्याधरयन्त्रस्वरूपं सचित्रं रसेन्द्रसारसंग्रहाख्ये ग्रन्थे प्रदर्शितम् ॥

---

1 विम्बीरसं प्रस्थामात्रं - दे 2 द्वज्रिमृत्सया - दे 3 रसै - ना

पाचनविधिः

क्षाराम्ललवणक्षौद्र ब्रह्मदण्डीय[1]शिग्रुकैः[1] ।
चण्डलीराजिकाभूर्जटण्कणैश्च समायुतम् ॥ 41 ॥

रसं संमर्थवस्त्रेण बध्वा, [2]पोटलिकां[2] ततः ।
*[3]यावनाला[3]रनालेन क्षिस्वा पोटलिकां[4]पचेत्[4] ॥ 42 ॥

इति पाचनविधिः

जारणम्

निर्गुण्डीबृहतीवासारसपूरितभाण्डके ।
रसं क्षिस्वा दशदिनं भूतले स्थाप्य चोद्धरेत् ।।
किञ्चित्क्षणं निरीक्षेत सदा चलति सूतकः ॥ 43 ॥

इति जारणम्

---

*यावनाल इति शब्दः किमर्थक इति न ज्ञायते।— संपादकः

---

1 शिगृकैः - दे शिघुजैः-ना 2 पोटिलिका-दे 3 यावंनारा - ना 4 क्षिपेत् - दे

ग्रासप्रधानम्

*गन्धकाभ्रकतैलेन [1]ढोला[1]यन्त्रे विपाचयेत् ।
काचपात्रे रसं स्थाप्य लोहपात्रे विनिक्षिपेत् ॥ 44 ॥

रञ्जनविधिः

द्विगुणं गन्धकं चैव हिङ्गुलं च चतुर्गुणम् ।
पञ्चभागमनःशैलं षडङ्गं च सुवर्चलम् ॥ 45 ॥

एतत्समाभ्रकं क्षिप्त्वा हंसपादीरसेन च ।
ताम्बूलीस्वरसेनापि [2]वासा[2]गो[3]क्षीरिका[3]रसैः ॥ 46 ॥

एतत्सर्वं विमर्द्याथ काचकुप्यां विनिक्षिपेत् ।
वज्रमृत्स्ना[4]सुसंमिश्रं[4] पटैराच्छाद्य सर्वशः ॥ 47 ॥

**वालुकायन्त्रमार्गेण पचेत् द्वादशयामकम् ।
रक्तवर्णो भवे[5]त्सूतः[5] उदयादित्यसन्निभः ॥ 48 ॥

इति रञ्जनविधिः

---

* ढोलायन्त्रं रसेन्द्रसारसंग्रहे सचित्रं प्रदर्शितम् ॥
** वालुकायन्त्रं रसेन्द्रसारसंग्रहे सचित्रं प्रदर्शितम् ॥

---

1 दोला - दे 2 वाशा - ना 3 गोरक्षिका - दे 4 तुसंमिश्रं - ना 5 त्सूत - दे

सर्वलोहशुद्धिः

सर्वेषां लोहजालानां पाषाणानां विशुद्धये ।
[1]एकैक[1] सुलभं मार्गं वक्ष्ये गन्धाभ्रकं विना ॥ 49 ॥

[2]आम्ल[2]क्षाररवि[3]क्षीरैः[3] स्नुहीदुग्धसमन्वितैः ।
धत्तूरचित्रत्रिफलास्वरसैर्गोजलान्वितैः ॥ 50 ॥
अग्नौ पुनः पुनः पाच्यं सप्तवाराणि ढालयेत् ।।

इति सर्वलोहशुद्धिः

[4]नव[4]पाषाणशुद्धिः

कुमारी मेघना[5]दि च[5] त्रिकटुत्रि[6]फलानि च[6] ॥ 51 ॥
कूष्माण्डकदली[7]शिग्र[7]गुञ्जासोमार्क[8]जारसाः[8] ।

पञ्चतत्व[9]ञ्जन[9]पुष्पाणि कञ्जाद्रुमद्रुमेन्द्रकाः ॥ 52 ॥

[10]एतेषां[10] स्वरसे सम्यक् भावयेदेकविंशतिः ।

इति नवपाषाणशुद्धिः

---

1 एकैकं - दे 2 अम्मल-दे, ना 3 क्षीर-दे 4 सर्व-दे 5 दादि-दे 6 फलान्वितैः-ना
7 शिगृ - दे, शुधु -ना 8 रारसः - दे 9 जुनि - दे 10 येतेषां - दे

गन्धकशुद्धिः

शृङ्गीकुमारीस्वरसमारनालादिपूर्वकम् ।
भाण्डवक्तं पुटं रुध्वा गन्धचूर्णं विनिक्षिपेत् ।
पुनर्भाण्डं तथाच्छाद्य पुटं दत्त्वा ततः परम् ॥ 53 ॥

स्वाङ्ग[1]शीतल[1] [2]मुद्धृत्य[2] [3]पुनरुद्धृत्य शुद्धये[3] ।
[4]पश्चा[4]त्पुन[5]र्नवाक्षीरै[5] [6]आज्येन[6] च शोधयेत् ॥ 54 ॥

इति गन्धकशुद्धिः

अभ्रकशुद्धिः

पीतकृष्णाभ्रकं सम्यक् [7]गोक्षीरैर्भावयेद्दृढम्[7] ।
सर्वदोषविनिर्मुक्तो रसायनकरो भवेत् ॥ 55 ॥

इति अभ्रकशुद्धिः

---

1 सीतल - ना 2 कं कृत्वा - दे 3 पुनः पुनः सुशुद्धये - ना 4 पञ्चा - दे
5 र्गवांक्षीरै - दे 6 राज्येन च - दे, जाड्येनैव - ना 7 भावयेद्गोजलान्वितैः - ना

सर्वपाषाणसत्त्वपातनम्

उदुम्बरवटाश्वत्थन्यग्रोधार्क[1]स्नुहिद्रुमाः[1]।
[2]कुरुण्टिका[2]क्षीरकर्णी कण्टकी च सुगन्धिका ॥ 56 ॥

[3]एतेषां[3] सर्ववृक्षाणां क्षीरैर्बहु विभावयेत्।
एकविंशतिवारं तु एकैकं भावयेन्मुहुः ॥ 57 ॥

क्षीरकन्दं कण्युकन्दं रम्भाकन्दं च सूरणम् ।
गुडु[4]गुग्गुल[4]ङ्गुञ्जाज्यमधुटङ्कणसंयुतम् ॥ 58 ॥

[5]संमर्द्याञ्जनतुल्या[5] च विशाला चान्ध्रमूषके ।
अधरोत्तरकं क्षिप्त्वा पाषाणं [6]चान्ध्र[6]येत्ततः ॥ 59 ॥

पटुमृत्तिकसंयुक्तं सप्तवाराणि कारयेत् ।
ध्मातं गाढं खराङ्गारैः काचबद्धमयं ततः ॥ 60 ॥

---

1 स्नुहिद्रमुमाः - दे 2 कुरुटिका - दे 3 यतेषां - दे 4 गुग्गुलु - दे 5 संमदर्थां चेन तुल्या - ना 6 चान्ध - दे

*[1]स्वाङ्ग[1]शीतलकं कृत्वा उद्धृत्य च निरीक्षयेत् ।
सर्वतः सूक्ष्मरूपाणि [2]दृश्यन्ते[2] मौक्तिका यथा ॥ 61 ॥

सर्वपाषाणसत्त्वानि [3]पतन्ती[3]दृग्विधं भवेत्।

इति सर्वपाषाणसत्त्वपातनम्

पाषाणवज्रलोहाभ्रकद्रुतिप्रकारः

पाषाणवज्ररत्नानां सर्वलोहाभ्रकादिनाम् ॥ 62 ॥

[4]द्रुति[4]रूपं प्रवक्ष्यामि [5]मार्गमेकं समर्थकम्[5]।
पूर्वोक्तोदुम्बरादीनां क्षीरैः सम्भावयेन्मुहुः ॥ 63 ॥

एकविंशतिवारं [6]तु[6] कृत्वा सूर्यपुटे [7]पचेत्[7] ।
क्षीरकन्द[8]द्वयं[8] चैव सूरणं पञ्चमित्रकम् ॥ 64 ॥

मांसभेद्यश्मभेदी च टङ्कणं नवसारकम् ।
सूचिकारं च पञ्चैतत् क्षिप्त्वा षोडशभागिकम् ॥ 65 ॥

---

* स्वस्याङ्गं यावच्छीतलम्, तावदित्यर्थः। (Body temperature)

---

1 साङ्ग - ना 2 दृश्यते - दे 3 पतन्ति - दे 4 धृति - ना 5 मासमर्मकपूर्वकम्-ना
6 तत् - दे 7 क्षिपेत् - दे 8 त्रयं - दे

[1]मातुलङ्गा[1]म्लदाडिम्बजम्बीरचणकाम्लकैः।
कृत्वान्ध्र[2]मूषायां[2] स्थाप्य वालुकायन्त्रके पचेत् ॥66॥

[3]बालाग्नि[3]ना पचेत्सम्यक् शनैश्च घटिकात्रयम्।
पश्चा[4]द्दर्शित[4]मुद्धृत्य द्रुतिस्तिष्ठति सूतवत्।
अनेनैवप्रकारेण कुरुते गगनादिकान् ॥67॥

इति पाषाणवज्रलोहाभ्रकद्रुतिप्रकारः

सर्वलोहमारणम्

शरावे नागवङ्गौ च [5]रसकं[5] प्रक्षिपेत्तथा।
ध्मात्त्वा चिरं द्रवीभूतं [6]तदूर्ध्वं[6] च मुहुर्मुहुः ॥68॥

राजवृक्ष[7]त्वचा[7]चूर्णं विकिरेत न मर्द्दयेत्।
इत्थं मुहुश्चिरं कुर्वन् त्रिलोहं भस्म जायते ॥69॥

गन्धकं च मनःशैलं हिङ्गुलं च रसं समम्।
मातुलङ्गाम्लजम्बीररसैः संमर्द्य तेन तत् ॥70॥

---

1 मातुलुङ्ग - दे 2 मूषया - दे, मुषयां - ना 3 बालाग्निं - दे 4 द्दर्सन - ना
5 धृति - ना 6 सासिकं - ना 7 तद्दूध्वं - ना

[1]शुध्वायो[1]हेमतारादिकांस्यपत्राणि लेपयेत् ।
इत्थं मुहुः सप्तवारं लेपयेदातपे क्षिपेत् ॥ 71 ॥

मूषाया[2]मथ[2] संस्थाप्य तत्पात्राण्यधरोत्तरम् ।
सम्यक् [3]तदान्ध्रणं[3] कृत्वा [4]पुट[4]येत्सप्तवारकम् ॥ 72 ॥

[5]स्वाङ्ग[5]शीतल[6]मुद्धृत्य[6] तस्मा[7]त्तदुधृतं[7] [8]ध्रुवम्[8] ।
इत्थं हि सर्वलोहानां मारणं क्रियतामिदम् ॥ 73 ॥

इति सर्वलोहमारणप्रकारः

अभ्रकमारणम्

व्योमपत्राणि सौवीरमार्कवस्वरसे[9]क्षिपेत्[9] ।
त्रिदिनानि ततः क्षिप्त्वा वस्त्रे [10]व्रीह्याभि[10]मर्दयेत् ॥ 74 ॥

तद्गृहीत्वा स्नुहिक्षीरैर्वासानिर्गुण्डिकारसैः ।
वटार्कक्षीरधत्तूर[11]रसैः[11] [12]संमर्द[12]ये[13]त्ततः[13] ॥ 75 ॥

---

1 शुल्बायो - दे 2 मध्य - ना 3 तदन्ध्रणं - दे 4 पुटे - दे 5 साङ्ग - ना 6 मुधृत्य - दे 7 तदु - दे 8 धृवम् - दे, ना 9 क्षीपत् - दे 10 व्रीद्याभि - दे, ना 11 रसै - दे 12 समर्द्य - दे 13 तत्पुनः - दे

क्रमात्सप्तपुटं कृत्वा [1]सिन्दूरं[1] [2]म्रियते[2] [3]ध्रुवम्[3] ।
वटमूलस्य च क्वाथैस्ताम्बूलीपत्र[4]सारतः[4] ॥ 76 ॥

[5]वासा[5]मत्स्याक्षिकाभ्यां च मीनाक्ष्या च कटिल्लया ।
पयसा वटवृक्षस्य [6]मर्दितं[6] पुटितं घनम् ॥ 77 ॥

भवेद्विंशतिवारेण सिन्दूरं रुचिरं भवेत् ।
[7][अभ्रकस्य भवत्येवं मारणं हि सूदुर्लभम् ॥ 78 ॥][7]

इति अभ्रकमारणम्

वज्रमारणम्

मेषमत्कुण [8]स्त्केन[8] भावयेदे[9]कविंशति[9] ।
मुहुः सूर्य[10]पुटे[10] स्थाप्य पश्चा[11]न्नागार्ज्जुनी[11]रसैः ॥ 79 ॥

वज्रतुण्डाख्यजन्तोश्च जठरे स्थाप्य वज्रकम् ।
[12]मल[12]पञ्चकसंयुक्तं निक्षिपेद्वज्र[13]मूषके[13] ॥ 80 ॥

---

1 सिन्धूरं - ना 2 मृयते - ना 3 ध्रुवम् - दे 4 सारसः - ना 5 वाशा - ना 6 मार्द्दितं - दे 7 अयं कुण्डलितो भागाः दे प्रतौ नास्ति। 8 रक्तेण - ना 9 विंशतिः - ना 10 पुटं - ना 11 नागार्ज्जुनी - ना 12 मलं-ना 13 मृत्स्नया - ना

पार्श्वे[1]मृदान्ध्रयित्वा तु[1] महागजपुटे दहेत् ।
भस्मीभवति तद्वज्रं [2]स्वाङ्गशीतल[2]मुद्धरेत् ॥ 81 ॥

इति वज्रमारणम्

सूतविचित्रमारणप्रकारः

[3][विचित्रसूतभस्मं च मारणं तु वदाम्यहम्][3]
सिद्धमूलिकनामाख्यमूलिकास्वरसेन च
सूतं त्रिवारं संमर्द्य निक्षिपेल्लोहपात्रके ॥ 82 ॥

ध्माते तु सुलभं भस्म जायते घटिका[4]द्वये[4] ।
गन्धकं सूततुल्यं च क्षिप्त्वा तन्मूलिकारसैः ॥ 83 ॥

रक्तमण्डल[5]धत्तूररसैः[5] संमर्द्य निक्षिपेत् ।
वालुकायन्त्रमार्गेण काचकुप्यां [6]तु [6]पाचयेत् ॥ 84 ॥

[7]दिनार्धे[7] नयनानन्दं [8]सिन्दूरं[8] भवति [9]ध्रुवम्[9] ।
तन्मूलिकारसेनैव नील[10]भृङ्गी[10]रसेन च ॥ 85 ॥

---

1 मृदां ध्रयित्वाथ - दे 2 साङ्गसीतल - ना 3 अयं कुण्डलितो भागः दे प्रतौ नास्ति
4 द्धके - दे 5 दत्तूरमसैः - दे, ना 6 दिनार्द्धे - दे 7 सिन्धूरं - ना 8 धृवम् - दे
9 भृङ्ग - ना

कृष्णवर्णत्वमायाति सूतो जम्बूफलोदयः ।
तन्मूलिकारसेनैव [1]वासायाः स्व[1]रसेन च ॥ 86 ॥

पीतवर्णं भवेद्भस्म [2]यामार्द्धे[2] सुमनोहरम् ।
तन्मूलिकारसेनैव कृष्णोन्मत्तरसेन च ॥ 87 ॥

श्मामवर्णं भवेद्भस्म [3]यामार्धे[3] सुमनोहरम् ।
तन्मूलिकारसेनैव जम्बूमूलरसेन च ॥ 88 ॥

मर्दयेत्सूतराजेन्द्रं [4]कर्बुरं[4] भवति क्षणात् ।
श्वेतवर्णं [5]ज्वरं घ्नन्ति[5] रक्तवर्णं त्रिदोषनुत् ॥ 89 ॥

पीतवर्णं हरेत्कुष्ठं श्यामलं सर्वदोषनुत् ।
कृष्णवर्णं मनुष्याणां सेवया देहसिद्धिदम् ॥ 90 ॥

[6]कर्बुरं[6] [7]वृष्य[7]कारि [8]स्याद[8]भीष्टगुणदं भवेत् ।

इति पारदविचित्रमारणप्रकारः

---

1 वासयास्व - दे, ना 2 यामार्धं - ना 3 यामार्ध - ना 4 कर्बुरं - दे
5 ज्वरन्घं च - दे 6 कर्बूरं - दे 7 रुष्य - ना 8 स्याअ - ना

*सिद्धपूजाविधिप्रकारः

अथ वक्ष्यामि सूतस्य [1]सिद्ध[1]पूजाविधिक्रमम् ॥ 91 ॥

शुक्लपक्षे त्वशून्ये च सुमुहूर्ते शुभे दिने ।
एकान्ते भूगृहे शुद्धे दृष्ट्वा कर्म समा[2]चरेत्[2] ॥ 92 ॥

सम्यग्जितेन्द्रियो भूत्वा दन्तधावनपूर्वकम् ।
कृत्वा तु मङ्गलस्नानं शुचिर्भूत्वोपवासकम् ॥ 93 ॥

अधः[3]शायी[3] ब्रह्मचर्यो [4]नियमेन[4] समाचरेत् ।
गृहमध्ये विरच्यादौ सहस्रदलपद्मकम् ॥ 94 ॥

प्रागाद्यष्टदिशास्वस्य पद्मान्यष्टदलानि च ।
[5]पृथक्[5] [6]प्रदेशे[6] पद्मानि नवाष्टदलसंयुतम् ॥ 95 ॥

सहस्रदल[7]पद्मोर्ध्वं[7] रसं शुद्धं च निक्षिपेत् ।
अष्टदिक्[8]सर्वपद्मोर्ध्वं[8] [9]उपवेश्या[9]ष्टसिद्धकान् ॥ 96 ॥

---

* सिद्धस्य सूतस्य = पारदस्य पूजाप्रकारः इत्यर्थः ।।

---

1 सिधि - ना 2 रभेत् - दे 3 शयी - ना 4 नियमेकः - दे, ना 5 प्रथक् - दे
6 प्रदेशो - दे 7 पद्मोर्द्ध - दे, पाद्मोर्व - ना 8 सर्वतश्चोर्ध्वं - ना 9 उपवेस्त्या - दे

नवनाथान् सिद्धरूपान् [1]नवदुर्गांश्च [2]ताः[2] स्त्रियः ।
कृत्वार्घ्य[3]पात्रं[3] सौगन्धिं गन्धपूष्पैर्मनोहरैः ॥ 97 ॥

धूप[4]दीपै[4]रलंकृत्य दिव्यवस्त्रैः प्रपूजयेत् ।
[5]दिव्यान्नै[5]र्मधु[6]मांसैश्च[6] प्रीणयित्वा च [7]ता नरः[7] ॥ 98 ॥

नमस्कृत्य स्वयं [8]तेषां[8] तासां [9]चानुज्ञयाऽऽचरेत्[9] ।
अथवा बुद्धिहीनोऽपि तूष्णीं भोजनमाचरेत् ।
सोऽपि शीघ्रं मृतिं गत्वा तस्य वंशक्षयो भवेत् ॥ 99 ॥

इति सिद्धपूजाविधिक्रमः

इष्टार्थसिद्धिगुटिकाप्रकारः

अङ्कोलार्कपला[10]शादिः[10] कण्टकीगिरिकर्णिका ।
सुरदाली च गुञ्जा च क्षुद्रालर्क[11]पुन[11]र्नवाः ॥ 100 ॥

एते दशद्रुमाः[12]श्वेताः[12] केसराः श्वेतपुष्पिकाः ।
तेषां तुल्यानि बीजानि चूर्णी[13]कृत्याति[13]सूक्ष्मकम् ॥ 101 ॥

---

1 नवदुर्गा - दे 2 ता - ना 3 पात्र - दे 4 दीपे - दे 5 दिव्यां नै - ना 6 पानैश्च - ना 7 ताम्नरः - दे 8 तेष्यां - ना 9 चानुयाचरेत् - दे 10 शादि - दे, ना 11 पुना - दे, ना 12 श्वेता - दे, ना 13 कृत्यादि - दे

तन्मूलत्वग्रसेनैव अजक्षीरेण भावयेत् ।
तैलमर्कपुटेनैव [1]उद्धृत्य[1] बहु सङ्ग्रहेत् ॥ 102 ॥

शुद्धसूतं [2]पलं[2]त्वे[3]कं[3] तैलं तत्तुल्यमात्रकम् ।
अधरोत्तरकं कृत्वा वज्रमूषान्तरे क्षिपेत् ॥ 103 ॥

ध्मात्वा मुहूर्त्तमात्रेण [4]बद्धो[4] भवति तद्रसः ।
अनेन सर्व[5]पाषाणाः[5] रागबद्धत्व[6]माप्नुयुः[6] ॥ 104 ॥

इष्टार्थसिद्धिगुटिका[7]नाम्ना[7] लोके [8]प्रकीर्त्तिता[8] ।
[9]एता[9]मेव जलोत्पन्नं [10]नरतैलेन[10] [11]पाचयेत्[11] ॥ 105 ॥

निक्षिपेद्वाचि यो धीमान् देवैरपि न दृश्यते ।
[12]जललो[12]हाग्निशुक्लादिवाचास्तम्भं करोति च ॥ 106 ॥

कृष्णगोक्षीरसारेण पक्त्वा [13]वाचि त्वहर्निशम्[13] ।
तत्सारसेवया देहसिद्धिर्मासत्रयाद्भवेत् ॥ 107 ॥

आयुष्यवृष्यसन्तान[14]तेजो[14]बलकरो भवेत् ।
षण्मासप्तसेवया नित्यं जरामरणवर्जितः ॥ 108 ॥

---

1 उधृत्य - दे, ना 2 पल - ना 3 स्त्वेकं - दे, ना 4 बद्धं - ना 5 पाषाणां - दे
6 माप्नुयात - ना 7 लोके - ना 8 प्रतिष्ठितः - ना 9 येता - दे 10 नटलेन - दे
11 विपाचयेत् - ना 12 जललौ - ना 13 वाचीयहर्निशम् - ना 14 तेजे - दे

[1]गरुत्मत्पक्षि[1]तैलेन [2]डोला[2]यन्त्रेण पाचयेत् ।
निक्षिपेन्मस्तके लोके वश्यं भवति [3]तद्ध्रुवम्[3] ॥109॥

हस्ते वा कर्षणं वाचि सारस्वतकरो भवेत् ।
[4]यस्यासौ[4] गुटिकासिद्धिर्भवत्यस्य गृहेऽनिशम् ॥110॥

सर्वैश्वर्याणि तिष्ठन्ति तद्राज्यं सुस्थिरं भवेत् ।
भूतप्रेतपिशाचादिदुष्टग्रहनिवारणम् ॥111॥

सर्वारोग्यकरं तस्य कालमृत्युजयो भवेत् ।
इष्टार्थसिद्धिरस्य स्यात् कालमृत्युजयो भवेत् ॥112॥

ताम्रशुद्धिं ततः कृत्वा दत्तूरीरसभावनैः ।
तत्ताम्रस्पर्शमात्रेण जाम्बूनन्दमयो भवेत् ।
रस[5]स्पर्शन[5]मात्रेण रजतोऽपि भवेत्ततः ॥113॥

इति इष्टार्थसिद्धिगुटिकाप्रकारः

---

1 गुरत्मान् पक्षि - दे, ना 2 दोला - दे, ढोला - ना 3 हिंरुवम् - ना
4 यस्यास्यै - ना 5 स्पर्श - दे, ना

दीपनग्रासप्रकारः

[1]व्रह्म[1]दण्डी च चण्डालीचित्रमौर्व्यार्चि[2]कात्ययः[2] ।
द्विक्षारं तुत्थलवणं नवसारं समांशकम् ॥ 114 ॥

[3]मातुलङ्ग[3]रसैर्मद्यं बद्धः [4]स्याद[4]धरोत्तरम् ।
क्षिप्त्वा वह्नौ [5]शनैर्ध्मा[5]त्वा [6]स्वाङ्ग[6]शीतलमुद्धरेत् ॥ 115 ॥

तद्वदेव सप्तवारं कृत्वा मूषान्तरे क्षिपेत् ।
तद्दीपनमुखो भूत्वा क्षु[7]धार्तो[7] व्याघ्रवद्भवेत् ॥ 116 ॥

लोहजालसमुद्रस्य [8]वडवानल[8]वद्भवेत् ।
ततस्तस्य चतुर्थांशं ग्रासं दत्त्वा सुहाटकम् ॥ 117 ॥

भूसार[9]सुर[9]दंत्याश्च स्वरसं पूरयेन्मुहुः ।
आतपे याममात्रेण जीर्णं भवति हाटकम् ॥ 118 ॥

पुनस्तस्य तृतीयांशं ग्रासं दत्त्वा क्षणं ग्रसेत् ।
द्वितीयांशं [10]पुनः[10]स्वर्णं [11]दहते[11] च तथोत्तरम् ॥ 119 ॥

---

1 व्रह्मं - ना 2 कात्सचेत् - ना 3 मातुलुङ्ग - दे 4 स्याप्य - दे 5 शनैध्मा - ना
6 साङ्ग - ना 7 ध़ात्रो - दे, द्रार्तो - ना 8 बडबानल - ना 9 सारु - दे
10 पुन - ना 11 दधने - दे, दहत्य - ना

समांशं निक्षिपेदेवं ग्रासयित्वा [1]च[1] बुद्धिमान् ।
तदूर्ध्वं सर्वलोहानां क्रमं ज्ञात्वा विनि[2]र्द्दिशेत्[2] ॥ 120 ॥

प्रतिक्षणं प्रतिदिशेदधिकं दीपनं भवेत् ।
यथापलप्रमाणस्य रसबद्धस्य हाटकम् ॥ 121 ॥

सहस्रपलमादातुं ग्रासं चेद्यदि शक्तिमान् ।
तथा तस्य मुखं बद्धं क्षमो भवति दैविकम् ॥ 122 ॥

यदि वा तद्बद्धश्चेद[3]शक्यो[3] [4]धूर्जटि[4]रपि ।
कियन्ति लोहजालानि सन्ति सर्वाणि भूतले ।
[5]ग्रासं[5] दातुं [6]सुसम्पूर्णं[6] ब्रह्मा सम्यक् [7]स शक्यते[7] ॥ 123 ॥

इति दीपनग्रासप्रकारः

रसमुखबन्धप्रकारः

रसबन्धस्य मर्मातिगूढं वक्ष्यामि [8]गूढ[8]वान् ।
समन्त्रमुक्तमार्गेण गूढं तद्बद्धमाचरेत् ॥ 124 ॥

---

1 सु - ना 2 द्दिशोत् - दे 3 शक्त्यो - दे, शक्त्यौ - ना 4 धूर्जटै - ना
5 ग्रासन्द - ना 6 सम्पूर्णं - वा 7 शक्यते - ना 8 गूड - दे, ना

कृष्णगोरोचनं कृष्णसाररोचनमेव च ।
प्रथमार्त्तवजं रक्तं [1]गज[1]शुक्लचतुष्टयम् ॥ 125 ॥

एतत्सर्वं समांशं च स्त्रीस्तन्येन च मर्द्दयेत् ।
त्रिबिन्दुमात्रं तद्बद्धं मन्त्रयुक्तं प्रयोजयेत् ॥ 126 ॥

मन्त्रः —
ॐ घटघटायमहारसभैरवाय मुखं बन्ध
मुखं बन्ध सुभीटय सुभीटय हुं फट् स्वाहा ॥ 127 ॥

तमदृष्ट्वा तथा धीमान् प्रयोगं कुरुते क्षणात् ।
मुख[2]बन्ध[2]मवाप्नोति [3]रसेन्द्रः[3] [4]स्त्वक्षयो[4] भवेत् ॥ 128 ॥

तस्मिन् काले महाघोषो जायतेऽशनिपातवत् ।
तस्माज्जीवति यो मर्त्यः स ईश्वरसमो भवेत् ॥ 129 ॥

अथवा तद्भयं गत्वा मृतो भवति सो नरः ।
आदौ भैरवमाराध्य निर्विघ्नेन समापयेत् ॥ 130 ॥

महाभैरवमन्त्रेण कुर्याद्रक्षामथात्मनः।
यथा तन्मुख[5]बन्धः[5] [6]स्यात्तथा[6] क्षीरे विनिक्षिपेत् ॥ 131 ॥

---

1 गद - ना 2 बद्ध - ना 3 ससेन्द्रो - दे, ससेन्द्र - ना 4 सक्षयो - दे
5 बद्ध - ना 6 स्यातदा - ना

एकविंशतिवारेण गोक्षीराब्धिं पिबेच्च सा ।
[1]तदूर्ध्वं[1] निक्षिपेत्कूपे तटाके वा जलाशये ॥ 132 ॥

[2]तज्जला[2]नि च सर्वाणि सप्तरात्रेण सा पिबेत् ।
श्रीचन्दनं च कर्पूरं समांशं मेलयेज्जले ॥ 133 ॥

अहोरात्रं च संस्थाप्य कुर्वीत च सुरक्षितम् ।
गुटिकां तां विनोदाय मस्तके [3]क्षिप्य यो[3]नरः ॥ 134 ॥

भुञ्जत्यपार[4]मन्नं[4] च वडवानलवद्भवेत् ।
घुटिकायाश्च महिमा दैवैरपि[5]न शक्यते[5] ॥ 135 ॥

इति रसमुख[6]बन्ध[6]प्रकारः

[7]वेधा[7]मुखरसः

गन्धकाभ्रक[8]तैलेन ग्रासं[8] दत्त्वा सुबुद्धिमान् ।
पञ्च[9]साहस्र[9]वेधी च तारे नागे तथा भवेत् ॥ 136 ॥

अयस्ताम्रद्वयेऽर्धं च वङ्गं च द्वादशं भवेत् ।
अभ्रकस्य द्रुतिं सम्यक् मेलयित्वा रसेन च ॥ 137 ॥

---

1 तदूर्ध्वं - ना 2 तद्दज्ञलानि - ना 3 यो क्षिप्यने - ना 4 मनं - ना 5 नराद्यते - ना
6 बद्ध - दे, ना 7 वेदा - दे, ना 8 तैलं तद्ग्रासं - दे 9 सहस्र - दे

गुटिका साऽक्षयाख्या च [1]आवर्त्यान्ते[1] क्षयी भवेत् ।
तत्सारसेवया वाचि मेह[2]जालं[2] विनाशयेत् ॥ 138 ॥

तारग्रासं च कुरुते वङ्गताम्र[3]द्वयोर्द्धकम्[3] ।
सहस्रदशवेधी च शुद्ध[4]तारो[4] भवेत्पुनः ॥ 139 ॥

सहस्रवेधी पाषाणं माक्षिकं च मनःशिला ।
हिङ्गुलं तालकं चैव हरिद्राख्यं च गन्धकम् ॥ 140 ॥

एतत्सर्वं समं कृत्वा [5]मातुलङ्गा[5]म्ल[6]मर्दितम्[6] ।
चणप्रमाण[7]वटुकां[7] कृत्वा ग्रासं ददाति च ॥ 141 ॥

षट्त्रिंशत्पुटमात्रेण धूमवेधी भवेद्रसः ।
लोहसिद्धि[8]र्यथैवाभूद्[8] दे[9]ह[9]सिद्धिर्भवि[10]त्तथा[10] ॥ 142 ॥

इति वेधामुखरसप्रकारः

जगन्मोहनरसः

नवरत्नाष्टलोहानां भस्म सूतस्य भस्म च ।
कृत्वा [11]समांशं[11] तत्सर्वं मेलयित्वा विचक्षणः ॥ 143 ॥

---

1 अवत्यन्ते - ना 2 जलं - दे 3 येर्द्धगम् - ना 4 तारा - दे 5 मातुलुङ्ग - दे
6 मद्धितम् - ना 7 वटुका - दे 8 र्यथेथैव - ना 9 भूदेह - दे 10 त्तदा - ना
11 समाशं - दे, ना

तत्त्रिंशांशं विषं कुष्ठं [1]त्रिकटु[1] त्रिफला तथा ।
टङ्कणं गन्धकं चैव माक्षिकं च मनःशिला ॥ 144 ॥

एतत्सर्वं विनिक्षिप्य मर्दयेच्च करण्डके ।
तस्य सर्षपमात्रन्तु प्रयोगं कुरुते भिषक् ॥ 145 ॥

श्लेष्मज्वराणां भृङ्गस्य रसेन गुडसंयुतम् ।
पित्त[2]ज्वराणां[2] मैलेयरसं शर्करया[3]न्वितम्[3] ॥ 146 ॥

वातज्वराणां स्वरसैः नागवल्या दलस्य च ।
एकाहिकव्द्याहिकस्य भूधात्रिस्वरसेन च ॥ 147 ॥

त्र्याहिकस्याजदुग्धेन तथा चातुर्थिकस्य च ।
विषमाणां ज्वराणां च [4]निम्बपत्र[4] रसेन च ॥ 148 ॥

अभिघातस्य गोजिह्वारसेन मधुना सह ।
दोषज्वरस्य वासायाः [5]शिग्रु[5]मूल[6]रसेपि[6] च ॥ 149 ॥

तत्तन्निमित्तो[7]त्पन्नानां[7] ज्वराणां कण्टकीरसैः ।
त्रिदोषाणां च सर्वेषाम् [8]आर्द्रकस्य[8] रसेन च ॥ 150 ॥

---

1 विकटु - दे 2 ज्वराणा - दे, ना 3 न्वितः - ना 4 निम्बप - ना 5 शिगृ - दे, शिघु - ना 6 रसेन - ना 7 त्पन्नानां - ना 8 आर्दकस्य - ना

ईदृग्विधानुपानैश्च [1]ज्वराणां[1] च प्रयोजयेत् ।
[2]सर्वाङ्ग[2] वातिकस्यार्कमूलानां स्वरसेन च ॥ 151 ॥

धनु[3]र्वात[3]स्य [4]निर्गुण्ड्या[4] पक्षवातस्य चाभया ।
सुप्तवातस्य गोमूत्रैः शेषवातस्य पूर्ववत् ॥ 152 ॥

तथा वृश्चिक[5]वातस्य[5] [6]नाग[6]केसरकान्वि[7]तम्[7] ।
तदन्येषां च वातानां सर्वेषामुष्ण[8]वारिणा[8] ॥ 153 ॥

तत्तत्सौम्यानुपानैश्च प्रयोगं कुरुते क्रमात् ।
सर्वाङ्गश्वेतकुष्ठश्च [9]नीलभृङ्गि[9]रसेन च ॥ 154 ॥

तद[10]न्येषां[10] च कुष्ठानां मधुना संप्रयोजयेत् ।
जलोदरस्य भूदन्तीमूलानां स्वरसान्वितम् ॥ 155 ॥

महोदरस्य भूनिम्बवज्रतैलेन योजयेत् ।
अन्येषामुदराणां च गिरिकर्णिकया समम् ॥ 156 ॥

[11]अश्मर्या[11] शर्करा[12]युक्तमश्म[12]भेदीरसेन च ।
बहुमूत्रस्य कण्टक्या मूलानां स्वरसेन च ॥ 157 ॥

---

1 द्वाराणां - दे 2 सर्वांङ्गं - दे, ना 3 वति - दे, ना 4 निर्गुंड्य - दे, ना
5 शृङ्गस्य - ना 6 शृङ्ग - दे 7 तैः - ना 8 वारि तत् - दे 9 नीलिभृङ्ग - दे, ना
10 न्येषा - ना 11 अश्मर्य - ना 12 युक्ते अश्म - ना

मधुशुक्लेक्षु[1]मेहे[1] [च] तल[2]पौटक[2]संयुतम् ।
रक्तमेहस्य गोक्षीरैः नवनीतेन वा तथा ॥ 158 ॥

तन्मूत्रं तक्रमेहस्य उदुम्बररसेन वा ।
तदन्येषां च मेहानां तिलपिष्टरसान्वितम् ॥ 159 ॥

अर्शसां गुडयुक्तेन काकोदुम्बरिकान्वितम् ।
मुण्ड्यार्द्रकरसैर्युक्तं शूलानां च प्रयोजयेत् ॥ 160 ॥

गुल्मानां च कुबेराक्षिचिञ्चाभस्मरसेन च ।
वह्निचूर्णेन पाण्डूनां क्षयशोफस्य गोपयः ॥ 161 ॥

क्षयस्य गोघृतेनैव कदलीरससंयुतम् ।
[3]कामिलायां[3] निशायुक्तं कण्टकीस्वरसेन च ॥ 162 ॥

शिरःशूलादिरोगाणां [4]शुष्यं[4] नस्यं करोति च ।
व्रणानामखिलानां च लेपयेद्गोघृतेन च ॥ 163 ॥

[5]तुलसी[5]रससंयुक्तं नाशयेत्सर्ववान्तिकम् ।
महागदानां सर्वेषां सेवयेदेकमण्डलम् ॥ 164 ॥

अर्द्धमण्डलमात्रं[6] तु तदन्येषां[6] [7]प्रयोज[7]येत् ।
महारोगप्रयोगाणाम् औषधं सर्षपद्वयम् ॥ 165 ॥

---

1 मेहा - दे 2 पोटिक - ना 3 कामिलाया- ना 4 शुष्या - दे 5 तुलशी - ना
6 तदन्येषां - दे 7 संप्रयोज - दे

त्रिमासं सेवयेन्नित्यं देहसिद्धिर्भवेत् [1]ध्रुवम्[1] ।
[2]त्रिसंवत्सर[2]मात्रेण जरामरणवर्जितः ॥ 166 ॥

पातालमधुगो[3]क्षीर[3]नवनीतानुपानकैः ।
सेवये[4]त्सितया[4]युक्तं तत्पथ्यनियमं विना ॥ 167 ॥

सेवयेद्बुद्धिमान् मर्त्यो ब्रह्मकल्पं स जीवति ।
जगन्मोहन[5]नामायं[5] रसो [6]लोके[6] प्रकीर्त्तितः ॥ 168 ॥

इति जगन्मोहनरसः

षण्मुखरसः

नागवङ्गाभ्रकाणां च [7]शुल्ब[7] लोहद्वयोपरि ।
[8]सिन्दूराणि[8] च [9]पञ्चानां[9] रस[10]सिन्दूर[10]मेव वा ॥ 169 ॥

एतानि समभागानि एकीकृत्य विचक्षणः ।
नित्यं तत्कृष्णकदलीफलयुक्तं तु लेपयेत् ॥ 170 ॥

---

1 धृवम् - दे 2 वत्सरत्रय - ना 3 क्षीरैः - ना 4 च्छर्करया - दे 5 नाम्ना - दे, नाम्नो - ना 6 लोक - दे, ना 7 शुल्बो - दे 8 सिन्धूराणि - ना 9 पञ्चाणां - ना 10 सिन्धूर - ना

मधुलेष्टान्न[1]पानादि[1] [2]भुञ्जये[2]द्बहुशो मुहुः ।
[3]संवत्सरार्ध[3]मात्रेण जरामरणवर्जितः ॥ 171 ॥

दिव्यदेहो भवेन्मर्त्यः सर्वव्याधिविनाशनः ।
कृष्णगोक्षीरसंयुक्तं [4]क्षयाणां[4] च प्रयोजयेत् ॥ 172 ॥

[5]मातुलङ्ग[5] [6]फलाम्लेन[6] सेवयेदर्द्ध[7]मण्डलम्[7] ।
[8]श्वासखा[8]सादिहृद्रोगपीनसान् प्रविशन्ति ये ॥ 173 ॥

अस्य प्रयोगचातुर्यादनुपानविशेषतः ।
सर्वे गदा [9]विनश्यन्ति[9] तूर्णमेव न संशयः।
*षण्मुखः कथितः सोऽयं रसेन्द्रो [10]देवदुर्लभः[10] ॥ 174 ॥

इति षण्मुखरसः

सार्वभौमरसः

हेमवज्राभ्रकाणां च भस्मत्रयसमांशकम् ।
भूनागसत्त्वभस्मापि तत्समं निक्षिपेद्बुधः ॥ 175 ॥

---

*सर्वरोगहरः सोयं देवनामपि दुर्लभः ।।षण्मुखः।। नं, प्रतौ पाठः ।

---

1 पानानि - दे, ना 2 भुञ्जिये - दे 3 संवत्सरार्द्ध-दे 4 क्षयणा-दे 5 मातुलुङ्ग-दे 6 पलेनैव - ना 7 मण्डले - ना 8 श्वासका - दे 9 न्विनश्यन्ति - ना 10 सुमनोहरः - ना

कृष्णचित्ररसेनैव [1]मर्द्दयेच्च[1] दिनत्रयम् ।
अमृतस्य कषायेण [2]कुमारीस्व[2]रसेन च ॥ 176 ॥

त्रिकटुत्रिफलानां च स्वरसे च विपाचयेत् ।
[3]प्लक्षाफला[3]न्वितं नित्यं वल्लमात्रं प्रयोजयेत् ॥ 177 ॥

सर्वव्याधिविनिर्मुक्तो वज्रदेहो भवेन्नरः ।
त्रिवत्सरप्रयोगेण [4]जीवे[दा]चन्द्रार्क[4]तारकम् ॥ 178 ॥

सर्वेषामायुधानां च विषाणां च निवारणम् ।
सर्व[5]शत्रून्[5] [6]जयत्याशु[6] भुवि संकीर्तितो भवेत् ॥ 179 ॥

[7]सार्वभौम[7]रसो ह्येषः सर्वराजमनोहरः ।
[8][सर्वरोगं हरत्याशु देवैरपि सुपूजितः][8] ॥ 180 ॥

इति सार्वभौमः

नवग्रहरसः

रसं च गन्धकं चैव मौक्तिकं च मनःशिला ।
कुष्ठं च शङ्खभस्मापि टण्कणं [9]माक्षिकं[9] तथा ॥ 181 ॥

---

1 मर्दयेच्च - ना 2 कुमारीश्च - दे 3 प्रक्षाफला - दे 4 जीवेच्चन्द्रार्क - दे, ना
5 शत्रु - ना 6 जयेत्याशु - ना 7 सर्वभौम - दे 8 अयं कुण्डलितो भागः दे. प्रतौ नास्ति 9 मोक्षिकं - दे

नेपालं च समांशानि निक्षिपेत्खल्वमध्यतः ।
मर्दयित्वा शनैः सम्यक् [1]त्रिफलास्वरसेन[1] च ॥ 182 ॥

निम्बदाडिममौर्व्यार्चि[2]वासाचित्र[2]रसैः पृथक् ।
काचकुप्यां विनिक्षिप्य वालुकायन्त्रमध्यतः ॥ 183 ॥

पचेन्मृत्तिकयोगेन [3]सप्तवारं[3] विलेपयेत् ।
पक्त्वा सप्तदिनान्येतत् [4]स्वाङ्गशीतल[4]मुद्धरेत् ॥ 184 ॥

[5]गुञ्जामात्रं[5] प्रयुञ्जीत [6]नागवल्ली[6]दला[7]न्वितम्[7] ।
सर्वे ज्वरा [8]विनश्यन्ति[8] शीतिकाविषमादयः ॥ 185 ॥

मरीचिमागधीशुण्ठीपित्तवात[9]कफोत्तरैः[9] ।
कुष्माण्डफलनीरेण तापज्वर[10]निवारणम्[10] ॥ 186 ॥

अजाक्षीरेण संयुक्तं पित्तज्वर[11]निवारणम्[11] ।
[12]तिन्त्रिणी[12]भस्म[13]योगेन[13] [14]सर्वगुल्म[14]निवारणम् ॥ 187 ॥

सैन्धवेन समायुक्तं [15]अष्टशूल[15]निवारणम् ।
[16]भृङ्गस्व[16]रससंयुक्तं श्लेष्मरोगनिवारणम् ॥ 188 ॥

---

1 त्रिफलाश्च रसेन - दे 2 वाशाचित्र - ना 3 सतवारं - ना 4 साङ्गशीतल - ना
5 गुञ्जामात्र - ना 6 नागवल्या - दे, ना 7 न्वितः - ना 8 विनस्यन्ति - दे
9 कफोत्तरैः-दे 10 निवारणः-ना 11 निवारणः ना 12 त्रिन्त्रि - दे 13 नीरेण - दे
14 पञ्चगुल्म - दे 15 मासशूल - ना 16 बृङ्गस्वर - दे

[1]तत्तत्साम्या[1]नुपानैश्च सर्व[2]रोगहरं[2] भवेत् ।
नवग्रहरसो नाम्ना प्रसिद्धो भुवि राजते ॥ 189 ॥

इति नवग्रहरसः

लोकोत्तरो रसः

[3]सूतगन्धक[3]नेपालदन्तिबीजानि टङ्कणम् ।
एरण्डतूण्डिबीजानि राजवृक्षोऽभयात्रिवृत् ॥ 190 ॥

पलाश[4]बीजान्यैकै[4]क[5]वृद्ध्या[5] भागोत्तरेण च ।
स्नुहीक्षीरेण संयुक्तं मर्द्दयेत् त्रिदिनं तथा ॥ 191 ॥

नारिकेल[6]फले[6] स्थाप्य महा[7]गाढातपे[7] क्षिपेत् ।
तत्तैलं जायते क्षिप्रं गृहीत्वा नाभिमध्यतः ॥ 192 ॥

अणुमात्रविलेपेन विरेकं कुरुते क्षणात् ।
घटिकापादमात्रेण दशवारं विरेचरेत् ॥ 193 ॥

[8]सुशीतलेन[8] तोयेन [9]शीघ्रं[9] प्रक्षालयेत्ततः ।
शरीरे गन्धमालिप्य माहिषंदधि[10]संयुतम्[10] ॥ 194 ॥

---

1 तत्तत्सात्म्या - दे 2 रोगहरो - ना 3 सूतगन्धक - ना 4 बीजन्यैकै - ना
5 वृध्या - दे, ना 6 फलै - ना 7 गाढान्त - ना 8 सुचीतलेन - ना 9 शीघ्र - ना
10 संयुतः - ना

राजान्नं भोजयेदम्लं तैलं निद्रां विवर्जयेत् ।
लोकोत्तररसो [1]ह्येषः[1] सर्वरोगान्तकः स्मृतः ॥195॥

इति लोकोत्तरोरसः

ग्रहणीवेलारसः

पारदाभ्रक[2]सिन्दूरं[2] विषं [3]जातीफलं[3] तथा ।
कुटजस्य च बीजानि धूर्त्तबीजानि टण्कणम् ॥196॥

व्योषं मुक्ताभयाचूतफलबीजं तथैव च ।।
बिल्वमातङ्गबीजानि दाडिमारलुबीजकम् ॥197॥

एतानि समभागानि निक्षिपेत्खल्वमध्यतः ।
कपित्थस्वरसेनैव मर्दयेत् तल्लक्षण[4]चूर्णकम्[4] ॥198॥

गुञ्जामात्रप्रमाणेन [5]वटकाः[5] कारयेद्भिषक् ।
एवं कुटजमूल[6]त्वग्रसेन[6] च प्रयोजयेत् ॥199॥

आमग्रहणिकां हत्वा कुरुते दीपनं परम् ।
मधुना [7]दधिना[7] वापि रक्तग्रहणिकं जयेत् ॥200॥

---

1 ह्योषः - दे 2 सिन्धूरं - ना 3 जातिफलं - दे 4 चूणकम् - ना 5 वटका - दे
6 त्वक् रग्र - ना 7 मधुना - ना

शुण्टीकषाय[1]संयुक्त[1]मतिसारं विनाशयेत् ।
सविशेषानुपानैश्च ग्रहणीनां प्रयोजयेत् ॥ 201 ॥

कुटजानां च मूलानि *[बिल्वदाडिममूलकम् ।
कपित्थचूतमूलानि] कुमुदानां तथैव च ॥ 202 ॥

कमलानां [2]च कन्दानां[2] चन्दनं खदिरं तथा ।
पाटोदुम्बरमूलानि [3]सौगन्धिं[3] ह्रस्वमूलकम् ॥ 203 ॥

एतानि समभागानि घटे [4]क्षिस्वान्धये[4]त्ततः ।
महागजपुटेनैव तैलमुद्धृत्य भूतले ॥ 204 ॥

विजयासिंहलालिङ्गिबीजतैलं तथैव च ।
एत[5]त्तैलत्रयं[5] तुल्यं [6]तैलार्धं[6] सूतभस्म च ॥ 205 ॥

[7]दत्त्वार्ध[7]मैलाकर्पूरमेकीकृत्य भिषग्वरः ।
नाभौ हस्ततले चाथ गुदे पादतलेऽथवा ॥ 206॥

[8]गुञ्जार्ध[8]मात्रलेपेन प्रवाहग्रहणीकुलम् ।
निवारयति लेपेन [9]समस्तो[9] [10]बृंहणं[10] तथा ॥ 207॥

---

*अयं कुण्डलितो भागः ना. प्रतौ नास्ति।

---

1 संयुक्त -दे 2 कन्दानां - दे 3 सुगन्धिं - दे 4 क्षिस्वान्धये - दे 5 तैलत्रयं - ना
6 तैलाद्धं - दे 7 दत्वार्द्ध - दे 8 गुञ्जार्द्ध - ना9 समस्त - ना 10 ब्रंह्णं - ना

रक्तामग्रहणीनां च दधिना संप्रयोजयेत् ।
रक्तग्रहणिभेदांश्च नाशये[1]देकमात्रकम्[1] ॥ 208 ॥

प्रमाणादधिकं योऽपि प्रयोगं कुरुते भिषक् ।
मलपिष्टं भवेदेकमानं च न विरेचयेत् ॥ 209 ॥

तथा लोकोत्तररसप्रयोगं कुरुते भिषक् ।
मलं भेदयति क्षिप्रं मलटङ्कविटङ्कवत् ॥ 210 ॥

शृङ्गिबेराम्भसा युक्तं आमशूलं विनाशयेत् ।
कथितो ग्रहणीवेल्लारसोऽयं लोक[2]विश्रुतः[2] ॥ 211 ॥

इति ग्रहणीवेलारसः

विश्वम्भरो रसः

[3]भूशिग्र[3]वज्रस्नुह्यर्ककुबेराक्ष्याग्निमूलकाः ।
भूधात्रीविषभूगुञ्जाकरं[4]जानां[4] समूलकाः ॥ 212 ॥

एतेषां भूपुटे तैलं संग्रहेत विचक्षणः ।
सूतशुल्बद्वयोर्भस्म हरितालं च गन्धकम् ॥ 213 ॥

---

1 देनमात्रतः - दे 2 विशृतः - दे 3 भूशिगृ - दे, भूशिघ्रु - ना 4 जाना - ना

त्रिकटुत्रिफलाहिङ्गुमाक्षिकं च समांशकम् ।
नागवङ्गद्वयोर्भस्म विषहिङ्गुल[1]मेव च[1] ॥ 214 ॥

एतानि पटुचूर्णानि तेन तैलेन मेलयेत् ।
नागवल्लीरसेनाथ वल्लमात्रं प्रयोजयेत् ॥ 215 ॥

तथार्द्रकरसोपेतं सैन्धवेन प्रयोजयेत् ।
अष्टशूलानि गुल्मानि नाशयेदेकमात्रया ॥ 216 ॥

[2]वातरोगान् कुष्ठरोगान्[2] [3]पित्तरोगाननेकशः[3] ।
पीनसादिश्लेष्मरोगान् ग्रन्थि[4]रोगांश्च[4] दारुणान् ॥ 217 ॥

अश्मरीमूत्रकृच्छ्रदिप्रमेहान् विषमज्वरान् ।
विनाशयेद्गदान् सर्वान् अन्यानपि निहन्ति च ॥ 218 ॥

विश्वम्भररसो नाम्ना सर्वरोगहरः स्मृतः ।
नराणां सुखदं चैव आयुर्वृद्धिकरं भवेत् ॥ 219 ॥

इति विश्वम्भररसः

---

1 मेकम् - ना 2 वातान् रोगान् कुष्ठान् - दे 3 पित्तरोगानपस्मारानेकशः - दे
4 रोगांच - ना

पञ्चबाणरसः

गन्धकाभ्रक[1]धत्तूर[1]गरलानां चतुष्टयात् ।
तैलमुद्धृत्य तेनैव दोलायन्त्रे विपाचयेत् ॥ 220 ॥

[2]घुटिका[2]तुलमात्रस्य [3]तैलं[3] प्रस्थप्रमाणकम् ।
तैलं निःशेषमापच्य अजगोखरवाजिनाम् ॥ 221 ॥

मूत्रैश्च पूर्ववत्पच्यात् मातुलङ्गफले क्षिपेत् ।
तद्द्वारमान्ध्रितं कृत्वा पुटयेत खल्वमात्रकम् ॥ 222 ॥

पश्चादुद्धृत्य तद्भस्म सर्षपं विनियोजयेत् ।
सर्षपद्वयमात्रन्तु ब्रह्मरन्ध्रे विलेपयेत् ॥ 223 ॥

त्रिदोषाणि च सर्वाणि सर्वसर्पविषाणि च ।
भूतप्रेतपिशाचादिग्रहण्यादिशिरोगदाः ॥ 224 ॥

कर्णाक्षिरोगान[4]न्यांश्च[4] नाशयेत्क्षण[5]मात्रतः[5] ।
पादाङ्गुष्ठेन लेपेन सर्ववातान् विनाशयेत् ॥ 225 ॥

[6]सूची[6]मुखप्रमाणं तु नागवल्ली[7]दलान्वितम्[7] ।
भक्षयेच्छूलजालानि गुल्मानि विविधानि च ॥ 226 ॥

---

1 धुत्तूर - ना 2 गुटिका - दे 3 तैल - ना 4 न्यांश्च - ना 5 मात्रकः - ना 6 सूचि - दे 7 दलान्वितः - ना

[1]कुक्षिरोगा[1]न[2]शेषांश्च[2] नाशयेन्नात्र संशयः ।
महिषीदधिसंयुक्तं पाण्डुजालं विनाशयेत् ॥ 227 ॥

कदलीफलसंयुक्तं भक्षयेच्च पिबेत्पयः ।
सर्वाङ्गं लेपयेद्गन्धं कर्पूरेण च संयुतम् ॥ 228 ॥

मदनोद्रेकसंयुक्तो महामत्त[3]गजेन्द्रवत्[3] ।
खरस्य दण्डवद्भूत्वा स्वदण्डमनिवारितम् ॥ 229 ॥

निरन्तरमहागाढरतिं कुर्वन् मदोद्यतः ।
यामत्रये शतं स्त्रीणां तथा [4]तृप्तिं[4] विना जयेत् ॥ 230 ॥

मुहुर्मुहुः पिबेद्द्रव्यं शर्करासंयुतं पयः ।
नारिकेलोदकं चैव पिबेच्छैत्योपचारकम् ॥ 231 ॥

कर्पूरान्विततताम्बूलं कुरुते सत्त्ववान्नरः ।
वृद्धिं च स्तम्भनं चैव कुरुते च निरन्तरम् ॥ 232 ॥

जम्बीरफलबीजानां चूर्णमुष्णेन वारिणा ।
पिबेत्तत्क्षणमात्रेण तदुद्रेकं विनाशयेत् ॥ 233 ॥

---

1 कुक्षियरोगा - दे 2 नेकांश्च - ना 3 गजन्द्रवत् - दे 4 तृप्ति - ना

सर्वेषामपि रोगाणां अनुपानविशेषतः ।
तदौषधप्रयोगेऽ[1]स्मिन् अप्रमत्तः[1] प्रयोजयेत् ॥ 234 ॥

पञ्चवाण[2]रसो ह्येषः सर्वलोकेषु विश्रुतः[2] ।
सर्वलोकेषु पूज्यो *[हि सर्वलोकोपकारकः] ॥ 235 ॥

इति पञ्चबाणरसः

ब्रह्मास्त्ररसः

कृष्णचित्रकमूलानि कृष्णामलकमेव च ।
कृष्णनिर्गुण्डिकामूलं कृष्णश्रीतुलसीदलम् ॥ 236 ॥

एतत्सर्वं समं कृत्वा [3]पटुचूर्णं[3] च कारयेत् ।
कृष्णवर्णं [4]सूतभस्म[4] लोह[5]वङ्गादिभस्मकम्[5] ॥ 237 ॥

चतुर्भस्म समं कृत्वा तदर्धं कृष्णपारदम् ।
तदेकांशं गन्धकं च तालकं च मनःशिला ॥ 238 ॥

नेपालं त्रिफला व्योषं [6]रामठं[6] माक्षिकं तथा ।
एतत्सर्वं समं पूर्वमूलिकाचूर्णमेव च ॥ 239 ॥

---

*अयं कुण्डलितो भागः मातृकासु नास्ति।

---

1 स्मिन प्रमत्तः - दे 2 रसः रव्यातः सर्वलोकोपकारकः - दे 3 पटुचूर्णं - दे, पाठचूर्णं - ना 4 सूतभस्मं - ना 5 भस्माहिवङ्गकम् - ना 6 रामटं - ना

तत्सर्वं निक्षिपेत्खल्वे कृष्णोन्मत्तरसेन च ।
भृङ्गनिम्बार्द्रकरसैः [1]जम्बीरस्व[1]रसेन च ॥ 240 ॥

मर्द्दयेद्दशवाराणि सम्यगञ्जनतुल्यकम् ।
*[मर्द्दयेत् त्रिदिनैश्चाथ] वटकान् कारयेद्भिषक् ॥ 241 ॥

एकमुष्णाम्बुना युक्तं वातानां च प्रयोजयेत् ।
नागवल्यमृतेन्द्राणां [2]रसैर्युक्तं[2] प्रयोजयेत् ॥ 242 ॥

[3]अर्धमण्डल[3]मात्रेण वातजालं [4]विनाशयेत्[4] ।
सप्तवारं त्रिवारं वा वातानल्पान् विनाशयेत् ॥ 243 ॥

भृङ्गीरसेन मधुना गोमूत्रेणाथवोभयात् ।
[5]ईदृग्विधानु[5]पानैश्च कुष्ठानां च प्रयोजयेत् ॥ 244 ॥

[6]सर्वकुष्ठा[6] विनश्यन्ति श्वेतकुष्ठं विशेषतः।
षण्मासं सेवयेन्नित्यं कृष्णं सर्वं वपुर्भवेत् ॥ 245 ॥

पुनः षण्माससेवायां रक्तवर्णं भवेद्वपुः ।
त्रिमासं सेवयेत्पश्चात्कृष्णं भवति तद्वपुः ॥ 246 ॥

---

*अयं कुण्डलितो भागः दे - प्रतौ नास्ति

---

1 जम्बीरश्च - दे 2 रसैयुक्तं - दे 3 अद्धमण्डल - दे, ना 4 विनश्यति - दे
5 ईद्रिग्विधानु - ना 6 सर्वेकुष्ठान् - दे

देहसिद्धिर्भवेत्तस्य जीवेच्चन्द्रार्कतारकम् ।
ज्वरादिसर्वरोगाणामनुपानविशेषतः ॥ 247 ॥

प्रयोजयेत्पलायन्ते सर्वरोगपतत्रिणः ।
ब्रह्मास्त्ररस इत्युक्तो विश्वामित्रेण [1]निर्मितः[1] ॥ 248 ॥

इति ब्रह्मास्त्ररसः

महाकालानलरसः

वराटशंखमण्डूर[2]शुक्ति[2]मौक्तिकशुक्तयः ।
गोखुराश्चाजदन्ताश्च शशदन्ताश्च तत्खुरम् ॥ 249 ॥

[3]मृगदन्ताश्व[3]दन्ताश्च [4]पुटयेदान्ध्रयेच्च तत्[4] ।
तद्भस्मतुल्यममृतं व्योषं च रसभस्म च ॥ 250 ॥

वैक्रान्तकान्तशुल्बानां भस्मान्येतानि मेलयेत् ।
खल्वे निक्षिप्य शार्दूलमृगादीनां च [5]पैत्तिकैः[5] ॥ 251 ॥

[6][सृगाल][6]मत्स्येन्द्रसर्पाणां पित्तैश्च [7]बहु मर्दयेत्[7] ।
करण्डके विनिक्षिप्य प्रमाणं सर्वपद्वयम् ॥ 252 ॥

---

1 विनिर्मितः - दे 2 शुक्त - ना 3 मृगादन्ताश्च - दे 4 पुटयेदन्ध्रयेतत् - दे
5 पैत्तकै- - दे 6 अयं कुण्डलिनो भागाः दे - प्रतौ नास्ति 7 बहुबावरोत् - ना

[1]नारिकेला[1]म्भसा युक्तं त्रिदोषाणां प्रयोजयेत् ।
सद्योऽ[2]ज्ञानतमो[2] हन्ति तदाश्चर्यकरं भवेत् ॥ 253 ॥

त्रिदोषराक्षसकुलं क्षिप्रमेव क्षयं न्येत् ।
तदा महाविदाहं च क्षुत्ति[3]पासाश्च[3] कारयेत् ॥ 254 ॥

[4]दध्यन्नेक्षुरसान्नेन[4] शर्क[5]राजलशीतले[5] ।
नालिकेरजलै *[श्चापि] कपित्थ[6]फलनीरकैः[6] ॥ 255 ॥

कदलीफलनीरेण †[ ]
तस्य शान्तिं प्रकुर्वीत देहे गन्धं विलेपयेत् ॥ 256 ॥

श्वासकासादिहृद्रोगपीनसान् वातजान् हरेत् ।
महा[7]कालानल[7]रसः ख्यातो [8]लोको[8]पकारकः ॥ 257 ॥

इति महाकालानलः

आग्नेयरसः

नागरं [9]मागधीवेल्ला[9]वह्निपथ्यासिताः समाः ।
तदेकांशं सूतभस्म तेषां चूर्णेन योजयेत् ॥ 258 ॥

---

*अयं कुण्डलितो भागः दे, प्रतौ नास्ति।
†अयं कुण्डलितो भागः मातृकासु प्रतौ नास्ति।

1 नालिकेरा - दे 2 ज्ञानतमं - ना 3 पासाञ्च 4 दध्यंनेक्षुरसांदेन - ना
5 राजरसशीतले - ना 6 फलनीरसैः - ना 7 कालानल - ना 8 रसलोको - ना
9 मागधीवल्ला - ना

प्रयोजयेन्निष्कमात्रं तरुणोष्णेन वारिणा ।
अधिकं दीपनं कुर्वन् भोजनं कुरुते नरः ॥ 259 ॥

गुल्म[1]भेदा[1] विनश्यन्ति सर्वान् सर्पान् विनाशयेत् ।
वात[2]शूलानि[2] शूलानि श्वासखासान् हरेदपि ॥ 260 ॥

[3]आग्नेयरस[3] इत्याख्यो गदान् दहति वह्निवत् ।
[4][नित्यं सेवनमात्रेण नरः सुखमवाप्नुयात्][4] ॥ 261 ॥

इति आग्नेयरसः

संशोषणरसः

बृहती पाटलामूलं वज्रदण्डी च चित्रकम् ।
भूदन्ती श्वेतगान्धारी [5]खञ्जिमञ्जि[5]ष्टकाभया ॥ 262 ॥

काकमाची [6]द्विजिह्वा[6] च गन्धर्वाह्वा द्विकण्टिका ।
धात्रीद्वयं चित्रकं च श्वेतहिङ्गुसुरद्रुमौ ॥ 263 ॥

[7]पौष्करं तुम्बरुं चैव व्योषं[7] क्षारद्वयं तथा ।
तदेकोत्तर[8]वृद्ध्या[8] च द्रव्याण्येतानि योजयेत् ॥ 264 ॥

---

1 भेदान् - दे, ना 2 शुनानि - दे, ना 3 अज्ञेयरस - दे, ना 4 अयं कुण्डलिता भागः दे, प्रतौ नास्ति 5 खञ्जिमञ्जि - दे, ना 6 द्विजिंह्वा - दे 7 पौषरं तुम्बरं चैव व्योष - ना 8 वृध्या - दे, ना

कृत्वा चूर्णं तदेकांशं माक्षिकं लोहभस्म च ।
सूतभस्मामृतं चूर्णमेकीकृत्वाऽखिलं तथा ॥ 265 ॥

गुञ्जामात्रप्रमाणं च प्रयोगं कुरुते भिषक् ।
जम्बीराम्लानुपानेन सेवयेन्मण्डलद्वयम् ॥ 266 ॥

एवं प्रतिदिनं सूक्ष्मं शोषणं कुरुते भिषक् ।
संशोषणरसो नाम्ना [1]प्रसिद्धः[1] सर्वरोगहा ।
मेरुमप्यणुमात्रं च कुरुते शङ्करोदितः ॥ 267 ॥

इति संशोषपरसः

रसमात्रा

हेमाभ्रकरसादिनां [2]सिन्दूरं[2] च चतुष्टयम् ।
कूष्माण्डफलनीरेण भावयेदेकविंशतिः ॥ 268 ॥

अश्वस्य [3]मुखधानैश्च[3] अश्वगन्धारसेन च ।
कृष्णगोक्षीररसकैः हरिणीक्षीरपूरकैः ॥ 269 ॥

बहुशो भावयेत्तस्य तवक्षीरीचतुर्गुणम् ।
द्राक्षाखर्जूरमधुकमष्टएलाक्षचूर्णकम् ॥ 270 ॥

---

1 प्रसिद्धे - ना 2 सिन्धूरं - ना 3 मुखधान्यैश्च - ना

[1]श्रीचन्दनाब्ज[1]तक्कोल्लजातिचूर्णं तथैव च ।
क्षिप्त्वा पश्चा[2]न्नारिकेल[2]फलनीरेण भावयेत् ॥ 271 ॥

कृष्णगोक्षीररसंयुक्तं निष्कमात्रं तु सेवयेत् ।
शर्करानवनीतेन सेवयेदेकमण्डलम् ॥ 272 ॥

क्षाराम्लवणं तैलं वर्जयेत् स्त्रीषु सङ्गमम् ।
[3]मधुरेष्टान्न[3]पानानि भोजयेद्दिवसत्रयम् ॥ 273 ॥

अतिशुष्कस्य कायस्य पुष्टिं वितनुतेऽपि च ।
स्त्रीणां च पुरुषाणां च कुरुते [4]कायवर्द्धनम्[4] ॥ 274 ॥

आयुष्करी [5]वश्यकरी[5] सत्त्वसन्तानकारिणी ।
रसमात्रेति विख्याता नाम्ना लोके महीयते ॥ 275 ॥

त्रैलोक्यचिन्तामणि रसः

रसं वज्रं हेम तारं ताम्रतीक्ष्णाभ्रकामृतम् ।
गन्धकं मौक्तिकं शङ्कं प्रवालं तालकं शिला ॥ 276 ॥

---

1 श्रीचन्दनाब्द - ना 2 न्नालिकेरफला - दे 3 मधुलेप्टान्न - ना 4 कार्यवर्धनम् - ना
5 वस्यकरी - ना

शोधितं तु समं सर्वं सप्ताहं भावयेद् दृढम् ।
निर्गुण्डी-सूरणद्रावैर्वज्रदुग्धे दिनत्रयम् ॥ 277 ॥

अनेन पूरयेत्सम्यक् पीतवर्णवराटिकाः।
टङ्कणं रविदुग्धेन पिष्ट्वा तासं मुखं लिपेत् ॥ 278 ॥

रुद्ध्वा भाण्डपुटे पाच्याः साङ्गशैत्यं विचूर्णितम्।
सर्वतुल्यं च वैक्रान्तं पादांशं रसभस्मकम् ॥ 279 ॥

शिग्रुमूलद्रवैः सर्वं सप्तावरं विभावयेत्।
चित्रमूलकषायेण भावनाश्चैकविंशतिः ॥ 280 ॥

आर्द्रकस्य द्रवैः सप्त त्रितयं विजयाद्रवैः।
जम्बीरैर्मातुलुङ्गैर्वा सप्तवारं विभावयेत् ॥ 281 ॥

सूक्ष्मचूर्णं ततः कृत्वा चूर्णपादांशटङ्कणम्।
टंकणांशं वत्सनाभं तत्समं मरिचं क्षिपेत् ॥ 282 ॥

लवङ्गं नागरं पथ्या कणा जातिफलं पृथक्।
प्रत्येकं वत्सनाभस्य पादांशं चूर्णितं क्षिपेत् ॥ 283 ॥

मातुलुङ्गार्द्रकद्रावैः सर्वमेतद्विलोडयेत्।
चतुर्गुञ्जमिदं खादेत्कणाक्षौद्रं लिहेदथ ॥ 284 ॥

क्षौद्रैर्वा चार्द्रकद्रावैः शुण्ठीक्काथगुडान्वितम् ।
अनुपानमिदं खादेत्सर्वरोगप्रशान्तये ॥ 285 ॥

वह्निं दीपयते बलं च कुरुते तेजो महद्वर्धते
वीर्यं वर्धयते विषं च हरते दार्ढ्यं विधत्ते तनोः।
अभ्यासेन निहन्ति मृत्युपलितं पुष्टिं प्रदत्ते नृणां
कासं कृन्तयते क्षुतं क्षपयते श्वासं च निष्कामते ॥ 286॥

वातं विद्रधिशूलपाण्डुग्रहणीरक्तातिसाराञ्जयेद्
गुल्मप्लीहजलोदराश्मरितृषाशोथान् हलीमोदरम् ॥287॥

लूताकृच्छ्रभगन्दरज्वरगणानर्शांसि कुष्ठान्यहो
